
अथ श्रीदण्डकप्रारंभः


गणपति
ब्रह्मा
शिव
विष्णु

श्रीगणेशायनमः हरिः ॐ पवित्रैस्थोव्वैष्णव्योसवितुर्व्वः प्रस
व ऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः तस्यतेपवित्रप
तेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् १ चित्पतिर्म्मापुनातुव्वाक्प
तिर्म्मापुनातुदेवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मि-
भिः ऽतस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् २
पुनंतुमादेवजनाः पुनन्तुमनसाधियः पुनंतुविश्वाभूतानिजातवे
दः पुनीहिमां ३ यथेमांव्वाचंकल्याणीमावदानिजनेभ्यः ब्रह्मरा

जन्याभ्याᳬं शूद्राय चार्याय च स्वाय चारणाय च प्रियो देवानां
न्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु
४ सत्रस्य ऽ ऋद्धिरस्यगन्म ज्योतिरमृता ऽ अभूम दिवम्पृथि-
व्या ऽ अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ५ स्वस्ति न ऽ इन्द्रो वृद्ध
श्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ६ भूरसि भूमिरस्यदितिरसि विश्वधाया
विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीन्दृᳬंह पृथिवीम्मा हिं

स्वहुलं पुरुस्पृहर्ठ० हरिरेतिकनिक्रंदत् २४ यदावध्नन्दाक्षायणाहि
रर्ण्यर्ठ० शुतानीकायस्रुमनुस्यमोनाः तन्म् ऽ आबध्नामिशुतशारदाया
युष्मा स्जरदष्टिर्य्यथासम् २५ आयुष्यं व्वर्च्चस्यर्ठ० रायस्पोषमौद्धि
दम इदर्ठ० हिरण्य व्वर्च्चस्व ज्जैत्रायाविशतादुमाम् २६ मनसः काम
माकूतिं व्वाचः सत्यमशीय पुशूनार्ठ० रूपमन्नस्युरसोयशः श्रीः
श्रयतामयिस्वाहा २७ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणा
म् दक्षिणाश्रुद्धामाप्नोतिश्रुद्धयासत्यमाप्यते २८ तस्पतीभिरनुग

क्षेमदेवाः पुत्रैर्भ्रातृभिरुतवा हिरण्यैः नाकङ्गृभ्णानाः सुकृतस्यलो
केतृतीयेपृष्ठे ऽअधिरोचनेदिवः २९ इतिप्रथमोध्यायः १ छ
आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च हिरण्ययेनसविता
रथेनादेवोयातिभुवनानिपश्यन् १ इमन्देवा ऽअसपत्नꣳ सुवद्ध्वम्मह
तेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय इमममुष्य
पुत्रममुष्यैपुत्रमस्यैविश ऽएषवोमीराजासोमोस्माकम्ब्राह्मणाना
ꣳराजा २ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्या ऽअयम् अपाꣳ

रेतोᳪ सिञ्चन्ति ३ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳪ सृ-
जेथामयञ्च अस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च-
सीदत ४ बृहस्पते ऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु
यद्दीदयच्छवस ऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम्। ५ अन्ना-
त्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ऋतेन स-
त्यमिन्द्रियं विपानᳪ शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु
६ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः ७

दू०
६

कयानश्चित्र ऽआभुवदूतीसदावृधः सखा कयाशचिष्ठयावृता ८
केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे समुषद्भिरजायथाः ९ इ
तिसमिद्धोमः द्वितीयोऽध्यायः २ ५ अग्निन्दूतम्पुरोदधेहव्यवाहु
मुपब्रुवे देवाँ२ ऽआसादयादिह १ अप्स्वग्नेसधिष्ट्वसौषधीरनुरु
ध्यसे गर्भेसञ्जायसेपुनः २ स्योनापृथिविनोभवानृक्षरानिवेश-
नि यच्छानःशर्म्मसप्रथाः ३ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्
समूढमस्यपाꣳसुरेस्वाहा ४ महाँ२ ऽइन्द्रोवज्रहस्तःषोडशीशर्म्म

ष्कृता गोभाज ऽ इत्किलासथ यत्सुनवेथ पुरुषम् १६ स्फजौ तो ज्यो
तिषासह शर्म्म वरुथ मासदत्स्वः ह्वासौ ऽ अग्ने विश्वरूपं ठ० संव्ययस्व
विभावसो १७ पूर्णादर्व्वि परापत सुपूर्णा पुनरापत वस्नेव विक्रीणा
वहा ऽ इषमूर्ज्जं ठ० शतक्रतो १८ नदेस्तु मित्रावरुणा तदग्ने शंयोरस्म
भ्यमिदमस्तु शस्तम अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादना
य १९ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं य्य
ज्ञं ठ० समिमन्दधातु विश्वे देवास ऽ इह मादयन्तामों ३ प्रतिष्ठ २० मनो

जूतिर्ज्जुषतामाज्ज्यस्येति मनसवा ऽइदर्ठ॰ सर्व्वमाप्तन्तन्मनसैवैतत्सर्व्व-
माप्नोति बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टय्यज्ञं७ समिमन्दधाति यद्व्यृ-
द्धन्तत्संदधाति विश्वेदेवास ऽइहमादयन्तामिति सर्व्वम्वै विश्वेदेवाः सर्व्वे-
णैवैतत्संदधाति स यद्दिकामयेत ब्रूयात्प्रतिष्ठेति २१ एष वै प्रतिष्ठाना-
म यज्ञो यच्चैतेन यज्ञेन यजन्ते सर्व्वमेव प्रतिष्ठितम्भवति २२ काण्डा-
त्काण्डात्प्ररोहन्ती परुषः परुषस्परि एवानो दूर्व्वे प्रतनु सहस्रेण श-
तेन च २३ चन्द्रमा ऽ अप्स्वन्तरा सुपर्णो धावते दिवि रयिम्पिशङ्गं-

यन्छतु हन्तुपाप्मानँय्योस्मान्द्वेष्टि ५ शुक्रज्योतिश्चचित्रज्योति
श्चसत्यज्योतिश्चज्योतिष्माँश्च शुक्रश्च ऽऋतपाश्चात्यर्ठ०हाः ६
प्रजापतेनत्वदेतान्यन्न्योविश्वारूपाणिपरिताबभूव यत्कामास्तेजुहु
मस्तन्नो ऽअस्तु वय ठं स्यामपतयोरयीणाम् ७ आयङ्गौः पृश्निर
क्रमीदसदन्मातरम्पुरः पितरञ्चप्रयंत्स्वः ८ ब्रह्मयज्ञानम्प्र-
थमम्पुरस्ताद्विसीमतःऽसुरुचोवेनऽआवः सबुध्न्याऽउपमाऽअ
स्यविष्ठाःसतश्चयोनिमसतश्चविवः ९ इतिनवग्रहस्थापनम् २

रु.दं.
७

त्र्यम्बकंयजामहेसुगंन्धिम्पुष्टिवर्धनम् उर्व्वारुकमिवबन्धनान्मृ-
त्योर्मुक्षीयमामृतात् त्र्यंबकंय्यजामहेसुगंधिंम्पतिवेदनम् उर्व्वा
रुकमिवबन्धनादितोमुक्षीयमामुतः १ श्रीश्चतलक्ष्मीश्चपत्न्यौ व-
होरात्रेपार्श्वे नक्षत्राणिरूपमश्विनौव्यातम् इष्णन्निषाणामुम्मंऽ
इषाणसर्व्वलोकम्मंऽइषाण २ यदक्रन्दःप्रथमंजायमानऽउद्यन्
त्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्म
हिजातन्तेऽअर्व्वन् ३ विष्णोररराटमसिविष्णोःश्नप्त्रेस्थोवि-

ष्णोः स्यूरोसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ४ आब्रह्मन्ब्रा
ह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्न्यः शूरऽ इषव्योतिव्याधी म-
हारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जि-
ष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निका
मे नः पर्ज्जन्न्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः
कल्प्यताम् ५ सजोषाऽ इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर
रविद्वान् जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ६

यमायत्वामखायत्वासूर्य्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः
सछंस्पृशस्पाहि अर्चिरसिशोचिरसितपोसि ७ कार्षिरसिसमुद्र
स्यत्वाक्षित्याऽउन्नयाभिसमापोऽअद्भिरग्मतसमोषधीभिरोषधीः ८
चित्रावसोस्वस्तितेपारमशीय ९ इतिनवग्रहदेवतास्थापनम् ४ ध
सनः पितेवसूनवेग्नेसूपायनोभवसचस्वानःस्वस्तये १ अपोऽअद्य
ह्यान्वचारिषछंरसेनसमसृक्ष्महि पयस्वानग्नऽआगमन्तम्मासछं
संसृजवर्चसाप्रजयाचधनेनच २ विदासितयादेवतयाङ्गिरस्वद्ध्रुवासी

दपरिचिदेसितयोर्देवनयोङ्गिरस्वङ्घुवासीद ३ इदं विष्णुः ४ इन्द्र
५ आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर ९ एतु सोमः देवसेनानाम
भिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ५ इन्द्रन्देवीर्विशो मरु
तोनुवर्त्मानो भवन्यथेन्द्रन्देवी विशो मरुतोनुवर्त्मानोभवन् एवमिमं
यजमानन्देवीश्च विशो मानुषीश्चानुवर्त्मानोभवन्तु ६ प्रजापतेनत्व
देतान्यन्यो विश्वा रूपाणि परिताबभूव यत्कामास्ते जुहुमस्तन्नोऽस्तु
वयम् मुष्य पितासावस्य पिता वयं स्याम पतयो रयीणां स्वाहा

दं॰ रुद्रयत्तेक्रिविपरन्नामतास्मिंहुतमस्यमेष्टमसिस्वाहा ७ नमोस्तु
३९ सर्पेभ्योयेकेचंपृथिवीमनु येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्यो
नमः ८ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः
सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ९ इ
तिनवग्रहाधिदेवतास्थापनम् ५ आनोभद्राः क्रतवोयन्तुविश्व
तोदब्धासोऽअपरीतासऽउद्भिदः देवानोयथासदमिद्वृधेऽअसन्न
प्रायुवोरक्षितारो दिवेदिवे १ देवानांभद्रासुमतिर्ऋजूयता

न्देवानाꣳ रातिरभिनोनिवर्त्तताम् देवानाꣳ सख्यमुपसेदिमाव्वय
यन्देवान ऽ आयुः प्रतिरन्तुजीवसे २ तान्पूर्व्वयानिविदाहूमहेव्वयम्भ
गम्मित्रमदितिन्दक्षमस्रिधम् अर्य्यमणंव्वरुणꣳ सोममश्विनास
रस्वतीनः सुभगामयस्करत् ३ तन्नः तन्नोव्वातोमयोभुव्वातुभेषज
न्तन्मातापृथिवीतत्पिताद्यौः तद्ग्रावाणः सोमसुतोमयोभुवस्तद-
श्विनाशृणुतन्धिष्ण्यायुवम् ४ तमीशानमतमीशानञ्जगतस्तस्थुष
स्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् पूषानोयथाव्वेदसामसद्वृधे

रु॰
१०

क्षितापायुरदब्धः स्वस्तये ५ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पू
षाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधा
तु ६ पृषदश्वामरुतः पृश्निमातरः शुभंयावानोविदथेषुजग्मयः
अग्निजिह्वामनवः सूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह ७
भद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरङ्गै
स्तुष्टुवाᳪंसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ८ शतमिन्नुशरदो
ऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् पुत्रासोयत्रपितरोभव

न्तिमानोमन्द्धारीरियुतायुर्गन्तोः ९ इतिनवग्रहप्रत्यधिदेवतास्थाप
नम् ६ गणानान्त्वागणपतिठं॰ हवामहे प्रियाणान्त्वाप्रियपतिठं॰ह
वामहेनिधीनान्त्वानिधिपतिठं॰ हवामहे व्वसोममम्माहमजानिगर्ब्भध॰
मात्वमजासिगर्ब्भधम् १ ॥ ॥जातवेदस॰ जातवेदसेसुनवामसो
ममरातीयतोनिदहातिवेदः सनः पर्षदतिदुर्गाणिव्विश्वानावेवसिन्धु
न्दुरितात्यग्निः २ व्वायोयेतेसहस्रिणोरथासस्तेभिरागहि नियु॰
त्वान्सोमपीतये ३ घृतङ्घृतपावानः पिवतव्वसांव्वसापावानः पि॰

द॰ २२

वनान्तरिक्षस्यहुविरसिस्वाहादिशः प्प्रदिशऽआदिशोविदिशऽउद्दि-
शोदिग्भ्यःस्वाहा ४ यावाङ्कशामधूमत्यश्विनासूनृतावती तयायज्ञ
म्मिमिक्षतम् ५ इतिपञ्चलोकपालस्थापनम् ७ अश्विनातेजसाच
क्षुः प्प्राणेनसरस्वतीव्वीर्यम् व्वाचेन्द्रोवलेनेन्द्रायदधुरिन्द्रियम् १
यमायत्वा २ अपमग्निः सहस्त्रिणोव्वाजस्यशतिनस्पतिः मूर्द्धाक-
वीरयीणाम् ३ ब्रह्मयज्ञानम्प्रथमम् ४ सोमोधेनुर्ठ०सोमोऽअर्वन्तमा
शुर्ठ०सोमोवीरङ्कर्मण्यन्ददाति सादन्यंविदथ्यर्ठ०सभेयम्पितृश्रव

एंत्र्योददाशदस्मै ५ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः बाहु-
भ्यामुततेनमः ६ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपि-
तासपुत्रः विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदिति-
र्जनित्वम् ७ वाचस्पतयेपवस्ववृष्णोऽअꣳशुभ्याङ्गभस्ति
पूतः देवोदेवेभ्यः पवस्वयेषाम्भागोसि ८ नमोस्तुसर्पेभ्यः ९
पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्व
धानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरो

द

२२

मीमदन्तपितरोऽतीतृपन्तपितरः पितरः शुन्धध्वम् १० भगप्रणेत

र्भगसत्यराधो भगेमान्धियमुदवाददन्नः भगप्रनोजनयगोभिरश्वै-

र्भगप्रनृभिर्नृवन्तः स्याम ११ दैव्यावध्वर्यूऽआगतᳫं रथेनसूर्यत्व

चा मध्वायज्ञᳫं समञ्जाथे तम्प्रत्नथायंवेनश्चित्रन्देवानाम् १२ वि

भ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविहुतम् वातजूतायोऽअ

भिरक्षतित्मनाप्रजाः पुपोषपुरुधाविराजति १३ त्वष्टातुरीयोऽअद्भु

तऽइन्द्राग्नीपुष्टिवर्द्धना द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्नवयोदधुः

१४ पीवोऽन्नारयिवृधः सुमेधाः श्वेतः सिषक्तिनियुतामभिश्रीः
तेव्वायवेसमनसोवितस्थुर्विश्श्वेन्नरः स्वपत्यानिचक्रुः १५ इन्द्रा
ग्नीऽआगतम् इन्द्राग्नीऽआगतꣳ सुतङ्गीर्भिर्नभोव्वरेण्यम् अस्य
पातन्धियेषिता १६ नमोमित्रस्य नमोमित्रस्यव्वरुणस्यचक्षसेमहो
देवायतदृतꣳ सपर्य्यत दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्य्या
यशꣳसत १७ सऽइषुहस्तैः सनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइ
न्द्रोगणेन सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता

१७ मातेवपुत्रम् मातेवपुत्रम्पृथिवीपुरीष्यमग्निᳪस्वेयोनावभा
रुख्यातांविश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्म्माविमु
ञ्चतु १८ अपाघमपकिल्बिषमपकृत्यामपोरपः अपामार्गत्वम-
स्मदपदुःष्वप्न्यᳪ० सुव १९ विश्वेद्यम् विश्वेऽअद्यमरुतोवि-
श्वेऽऊतौविश्वेभवन्त्वग्नयः समिद्धाः विश्वेनोदेवाऽअवसागमन्तु
विश्वमस्तुद्रविणंवाजोऽअस्मे २० तत्सवितुः तत्सवितुर्वरेण्य
म्भर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात् २१ इदंविष्णु० २२ व

सोऽहं पुवित्रेम् वसोंः पवित्रमसिशतधारं वसोंः पवित्रमसिसहस्र-
धारम् देवस्त्वासविता पुनातु वसोंः पवित्रेणशतधारेणसुप्वाकाम
धुक्षः २३ वरुणस्योत्तम्भनम् २४ नुतनोहिर्बुध्न्यः शृणोत्वज एक-
पात्पृथिवीसमुद्रः विश्वेदेवा ऋतावृधो हुवानास्तुतामन्त्राः कवि
शस्ता अवन्तु २५ शिवोनामासिस्वधितिस्तेपितानमस्ते अस्तुमामा
हिंᳬसीः निवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजा
स्त्वायसुवीर्याय २६ पूषन्तवव्रतेवयन्नरिष्येमकदाचन स्तोतारस्त

ऽइद्द्रस्यासि २७ इतिनक्षत्रस्थापनन्नामाष्टमोऽध्यायः८ योगेयोगेत
वस्तरम् वाजेवाजेहवामहे सरवाय॒ऽइंद्रमूतये १ भद्रङ्कर्णेभिः श्रृ
णुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनू
भिर्व्यशेमहिदेवहितंयदायुः २ ध्रुवासिध्रुवोयंय्यजमानोस्मिन्ना
यतनेप्रजयापशुभिर्भूयात् घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्य
च्छदिरसिविश्वजनस्यच्छाया ३ पञ्चनद्यः सरस्वतीमपियन्ति
सस्रोतसः सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ४ सप्तऽऋषयः

प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्रमादम सप्तापः स्वपतोलोक
मीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ५ इमम्मेवरुण
श्रुधीहवमद्याचमृडय त्वामवस्युराचके ६ प्रपर्वतस्यवृषभस्यपृष्ठा
न्नावश्चरन्तिस्वसिचऽइयानाः ताऽआववृत्रन्नधरागुदक्ताऽ-
अहिम्बुध्न्यमनुरीयमाणाः विष्णोर्विक्रमणमसिविष्णोर्वि-
क्रान्तमसिविष्णोः क्रान्तमसि ७ जवोयः जवोयस्तेवाजिन्नि
हितोगुहायः श्येनेपरीतोऽअचरच्चवाते तेननोवाजिन्बलवा

द.
२५

न्वलेनवाजाजिच्चभवसमनेचपारयिष्णुः वाजिनोवाजजितोध्वा
नꣳ सरिष्यन्तोबृहस्पतेर्भागमवजिघ्रत ८ सुपर्णोसिगरुत्मां
स्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ स्तोमऽआत्माछ
न्दाꣳसियङ्गानियजूꣳषिनाम सामतेतनूर्वामदेव्यंयज्ञायज्ञिय
म्पुच्छंधिष्ण्याःशफाः सुपर्णोसिगरुत्मान्दिवङ्गच्छस्वःपत
९ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् तेषाꣳस
हस्रयोजनेवधन्वानितन्मसि १० सहस्रशीर्षापुरुषः सहस्राक्षः

सहस्त्रपात् सभूमिर्ठं० सर्व्वतस्स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ११ सू०
वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशो ऽनमीवोभवान यत्वेम
हेप्रतितन्नोजुषस्वशन्नो ऽस्तुद्विपदेशञ्चतुष्पदे १२ सू० अमीव
हः अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् सरवासुशेव ऽए-
धिनःस्वाहा १३ गणानान्त्वा० १४ नमोस्तुसर्प्पेभ्यः० १५ सू० कु
जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः सनःपर्षदतिदु
र्गाणिविश्वानावेवसिन्दुरितात्यग्निः १६ प्रजापतेन प्रजापतेन

दं०
१६

त्वदेतान्यन्योविश्वारूपाणिपरिताबभूव यत्कामास्तेजुहुमस्तन्नो
ऽअस्तुवयꣳस्यामपतयोरयीणाम् १७ योवः शिवतमोरसस्त
स्यभाजयतेहनः उशतीरिवमातरः १८ इतिध्रुवादिस्थापनम्न
वमोऽध्यायः ९ ७ ऋक् अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विज
म् होतारंरत्नधातमम् १ यजु इषेत्वोर्ज्जेत्वावायवस्थदेवोवः सवि
तापार्पयतुश्रेष्ठतमायकर्म्मणे ऽआप्यायध्वमघ्न्या ऽइन्द्रायभागम्प्र
जावतीरनमीवा ऽअयक्ष्मामावस्तेन ऽईशतमाघशꣳसो ध्रुवा ऽअ

स्मिन्नोगोपतौस्यात्तवृद्धीर्य्यजेमानस्यपशून्पाहि २ साम अग्न
आयाहिवीतयेगृणानोहव्यदातये निहोतासत्सिबर्हिषि ३ अथ
र्वशन्नः शन्नोदेवीरभिष्टेय ४ इतिवेदादिस्थापनम् १० त्रातार
मिन्द्रम् त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम्
ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः १ त्वन्नो
ऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्या त्रातातोकस्य
तनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते २ सू० स्रुगग्नः स्रुगग्न

दं॰
८७

पन्थामनुप्रदिशन्न ऽएहिज्योतिषामध्येत्वधजरन्न ऽआयुः अपैतुमृत्युरमृ
तन्न ऽआगाद्वैवस्वतोनो ऽअभयङ्कृणोतुस्वाहा ३ अरक्तन्न्वन्तुमयं
ज़मानमिच्छरस्तेनस्येत्यामान्विहिस्तस्करस्य भन्यमस्मादिच्छसा
त ऽइत्यानमोदेवेभिर्निर्ऋतेतुभ्यमस्तु ४ तत्त्वायामिब्रह्मणावन्दमा
नस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंस
मानऽआयुःप्रमोषीः ५ आनः आनोनियुद्भिः शतिनीभि
रध्वरंसहस्त्रिणीभिरुपयाहियज्ञम् वायो ऽअस्मिन्त्सवनेमाद

यस्त्वयूयम्पातस्वस्तिभिः सदानः ६ व्वयर्ठ॰ सोमव्व्रतेतवमन-
स्तनूषुविब्भ्रतः प्प्रजावन्तः सचेमहि ७ नमीशानम् ८ अस्मेरु
द्राः अस्मेरुद्रामेहनापर्वतासोव्वृत्रहत्येभरहूतौसजोषाः यः श
ठ॰ सतेस्तुवतेधायिपज्ज्रइन्द्रज्ज्येष्ठा ऽ अस्म्मा २ऽ अवन्तुदेवाः ९
स्योनापृथिवि १० इतिदिक्पालस्थापनम् ११ विधिज्जुहोमिम
नसाघृतेनयथादेवा ऽ इहागमन्वीतिहोत्त्रा ऽ ऋतावृधः पत्तेवि
श्वस्यभूमनोजुहोमिविश्श्वकर्म्मणेविश्श्वाहादाभ्यर्ठ॰ हविः १

दं० सप्तते सप्तते ऽअग्नेसमिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधा
८ मप्रियाणि सप्तहोत्राः सप्तधात्वायजन्तिसप्तयोनीरापृणस्वघृते
नस्वाहा २ शुक्रज्योतिश्च ३ ईदृङ् ईदृङ्गान्यादृङ्सदृङ्प्रति
सदृङ् मितश्चसम्मितश्चसभराः ४ ऋतश्चसत्यश्चध्रुवश्चधरु
णश्च धर्त्ताचविधर्त्ताचविधारयः ५ ऋतजिच्चसत्यजिच्चसेनः
जिच्चसुषेणश्च अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ६ ईदृक्षा
सऽएतादृक्षासः ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासः प्रति

सहस्रासऽएतैन मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतो
यज्ञेऽअस्मिन् ७ स्वतवांश्चप्रघासोचसान्तपनश्चगृहमेधी
च क्रीडीचशाकीचोज्जे ८ उग्रश्चभीमश्चध्वान्तश्चधुनिश्च सा
सत्वाँश्चाभियुग्वाचविक्षिपःस्वाहा ९ पुनस्त्वादित्यारुद्रावसवः
समिन्धताम्पुनर्ब्रह्माणोव्वसुनीथयज्ञैः घृतेनत्वन्तन्वंव्वर्द्धय
स्वसत्याःसन्तुयजमानस्यकामाः १० त्र्यायुषञ्जमदग्नेःकश्य
पस्यत्र्यायुषम् यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ११ इतिपू

र्णाहुतिः १२ इन्द्रदेवी १ इमर्ठ० स्तनम् इमर्ठ० स्तनमूर्जस्वन्तन्ध
यापाम्प्रपीनमग्नेसरिरस्यमद्ध्ये उत्सञ्जुषस्वमधुमन्तमर्वन्त्समु-
द्रियर्ठ० सदनमाविशस्व २ घृतम्मिमिक्षे घृतमस्ययोनिर्घृतेश्रितो
घृतम्वस्यधाम अनुष्ष्वधमावहमादयस्वस्वाहाकृतं वृषभवक्षि
हव्यम् ३ समुद्रादूर्मिर्मधुमाँ २ऽ उदारदुपार्ठ० शुनासममृतत्व
मानट् घृतस्यनामगुह्यं य्यदस्तिजिह्वादेवानाममृतस्यनाभिः
४ व्वयन्नाम व्वयन्नामप्प्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामा

नमोभिः उप ब्रह्मा शृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौरऽएत
त् ५ चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां२ऽ आविवेश ६ त्रि-
धा हितम्पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दुऽएकं॰ सूर्य्य
ऽएकञ्जजान वेनादेकं छं स्वधया निष्टतक्षुः ७ एताऽअर्षन्ति हृ
द्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे घृतस्य धाराऽअभिचाक
शीमि हिरण्ययो वेतसो मध्यऽआसाम् ८ सम्यक्स्रवन्ति स

दं०

२०

म्यक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः एतेऽ
अर्षन्त्यूर्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणाः ९ सिन्धोरि
व सिन्धोरिवप्राध्वनेशूघनासोवातप्रमियःपतयन्तियह्वाः घृ
तस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्मिभिःपिन्वमानः
१० अभिप्रवन्त अभिप्रवन्तसमनेवयोषाःकल्याण्यःस्म
यमानासोऽअग्निम् घृतस्यधाराःसमिधोनसन्तताजुषाणो-
हर्यतिजातवेदाः ११ कन्याऽइववहतुम् कन्याऽइववहतु

मेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि यत्रसोमः सूयतेय
त्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते १२ अभ्यर्षतसुष्टुतिङ्ग
व्यमाजिमस्मासुभद्राद्रविणानिधत्त इमंयज्ञन्नयतदेवतानो
घृतस्यधारामधुमत्पवन्ते १३ धामन्ते विश्वम्भुवनम-
धिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि अपामनीकेसमिथेयऽ
आभृतस्तमश्याममधुमन्तन्तऽऊर्मिम् १४ चतुर्भिश्चचतुर्भि
श्चद्वाभ्याम्पंचभिरेवच हूयतेचपुनर्द्वाभ्यान्तस्मैयज्ञात्मनेन

मः १५ ज्ञानतोज्ञानतोवापि मंत्रकर्म्मक्रियाविधिः संपूर्णंकुरु-
यज्ञेशगार्हपत्यनमोस्तुते १६ यथाशस्त्रप्रहाराणांकवचंभव-
निवारणम् तद्वद्देवोपघातानांशांतिर्भवनिवारणम् १७ इति
वैश्वानरस्तुतिः १३ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन
महेरणायचक्षसे १ योवःशिवतमोरसस्तस्यभाजयतेहनः
ऊशतीरिवमातरः २ तस्माऽअरंङ्गमामवोयस्यक्षयायजिन्वथ
आपोजनयथाचनः ३ भ्रातारमिन्द्रम् ४ वरुणस्योत्तंभनम्

५ भगपप्रणैत: ६ इदमापः प्रवहतावद्यञ्चमलञ्चयत् यच्चाभि
दुद्रोहानृतंय्यच्चशेपेऽअभीरुणम् आपोमातस्मादेनसः पवं
मानश्चमुञ्चतु ७ समुद्रायत्वावातायस्वाहासरिरायत्वावातो
युस्वाहा अनाधृष्यायत्वावातायस्वाहाप्रतिधृष्यायत्वावा
तायुस्वाहा अवस्यवेत्वावातायुस्वाहाशिमिदायत्वावाता-
युस्वाहा ८ पुनन्तुमादेवजनाः ९ आप्यायस्वसमेतुतेवि
श्वतः- सोमवृष्ण्यम् भवावाजस्यसङ्गथे १० शिरोमेश्रीर्य्यो

दं० शो मुखन्त्विषिः केशाश्च श्मश्रूणि राजा मे प्राणो ऽअमृत-
२२ ठं० सम्म्राट् चक्षुर्व्विराट्श्रोत्रम् ११ जिह्वा मे भद्रं वाङ्महो मनो
मन्युः स्वराड्भामः मोदाः प्रमोदा ऽअङ्गुलीरङ्गानि मित्रम्मे स
हः १२ बाहू मे बलमिन्द्रियठं० हस्तौ मे कर्म्म वीर्य्यम् आत्मा
क्षत्रमुरो मम १३ पृष्ठीर्म्मे राष्ट्रमुदरमठं० सौग्ग्रीवाश्च श्रोणी
ऊरू ऽअरत्नी जानुनी विशो मेऽङ्गानि सर्व्वतः १४ नाभिर्म्मे चि
त्तं विज्ञानम्पायुर्म्मेऽपचितिर्ब्भसत् आनन्दनन्दावाण्डौ मे भगः

सौभाग्यमस्य सं जङ्घाभ्याम्मूर्द्धां धर्मोऽसि मा वि शिरा जा प्रति-
ष्ठितः १५ पयः पृथिव्याम् १६ देवस्य त्वा सवितुः प्रसवे-
ऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् सरस्वत्यै वाचो यन्तु-
र्यन्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ १७
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्या
म् सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चा
मि १८ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो ह-

द०
२३

स्तोभ्याम् अश्विनोर्भैषज्ज्येन तेजसे ब्रह्मवर्च्चसायाभिषिञ्चा
मि सरस्वत्यै भैषज्ज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्ये
न्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि १९ ब्रा० पालाशम् पा
लाशं भवति तेन ब्राह्मणो भिषिञ्चति ब्रह्म वै पालाशो ब्रह्म-
णैवैनमेतदभिषिञ्चति २० ब्रा० सर्वैषांवा ऽएष वेदानां रसो
पत्साम सर्वेषामेवैनमेतद्वेदानां रसेनाभिषिञ्चति २१ ब्रा० य
हेदकल्पाज्जुहोति प्राणा वै कल्पा ऽ अमृतमु पवै प्राणा ऽ अमृते

नैवैनमेतदभिषिञ्चति २२ दीर्घायुत्वाय बलाय वर्चसे सुप्रजा
स्त्वा सहसा ऽथो जीव शरदः शतम् २३ द्यौः शान्तिरन्तरि
क्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वन
स्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शा
न्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि २४ इत्यभिषेकोऽस्तु १४ अ॰ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्प
वमानम्महीयते धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सर-

दं०
२४

न्दीर्घमायुः १ पुत्रमिवपितरौ पुत्रमिवपितरावश्विनोभेन्द्राव
थुः काव्यैर्द्दंसनाभिः यत्सुरामंव्यपिवः ॥ ॥ ॥ शची
भिः सरस्वतीत्वामघवन्नभिष्णक् २ कामङ्कामदुधेधुक्ष्वमित्राय
वरुणायच इन्द्रायाश्विभ्यांम्पूष्णेप्रजाभ्यः ओषधीभ्यः ३
ब्रा० अथपूर्वाईनदक्षिणाकामङ्कामदुघेधुक्ष्वमित्रायवरुणा
यच इन्द्रायाश्विभ्यांम्पूष्णेप्रजाभ्यः ओषधीभ्यः इतिसर्व्वदे
वत्यावैकृषिरेताभ्योदेवताभ्यः सर्व्वान्कामान्धुक्ष्व ४ ब्रा० अ

थसुमङ्गलनामानꣳ ह्वयति बकुकारश्श्रेयस्करभूयस्करेति ह ऽ ए
वन्नामाभवतिकल्याणमेवैतन्मानुष्यैवाचोवदति ५ ब्रा· तेवैदे·
वास्तन्नाविदुर्य्येनेदꣳ॰ सर्व्वंवाकुर्व्वन्नवासर्व्वंयद्युतिवारेचयन्नावा·
व्याययंस्त ऽ एतामृचमपश्यन् धामच्छदग्निरिन्द्रोब्रह्मादेवोबृ
हस्पतिः सचेतसोविश्वेदेवायज्ञंप्रावन्तुनः शुभे इति ६
यजुः इमामे ऽ अग्न ऽ इष्टकाधेनवः सन्त्वेकाचदशचदशच शत
ञ्चशतञ्चसहस्रञ्चसहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्च

दं.
२५


प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यंचान्तश्च परार्द्धश्चैता
मेऽअग्नऽइष्टकाधेनवः सन्त्वमुत्रामुष्मिँल्लोके ७ विवस्वन्ना
दित्यैषतेसोमपीथस्तस्मिन्मत्स्व श्रदस्मैनरोवचसेदधात
न यदाशीर्दादम्पतीवाममश्नुतः पुमान्पुत्रोजायतेविन्दते
वस्वधाविश्वाहारपऽएधतेऽगृहे ८ अग्नेगृहपतेसुगृहपति
स्त्वयाग्नेहङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्नेगृहप-
तिनाभूयाः अस्थूरिणौगार्हपत्यानिसन्तुशतꣳहिमाः सूर्य्य

स्यादृत्तमन्वावर्ते ९ धन्वनागाः धन्वनागाधन्वनाजिज्जयेम
धन्वनातीव्राः समदौजयेम धनुःशत्रोरपकामङ्कृणोतिधन्व-
नासर्वाः प्रदिशौजयेम १० विश्वानिदेवसवितर्दुरितानिपरा
सुव यद्भद्रन्तन्नऽआसुव ११ व्रा० तस्यैसप्तदशसामिधेन्यो-
भवन्तिसद्यन्तावाज्यभागौसदेवावरुन्धे विश्वानिदेवसवितः
सघानोदेवः सवितासहावेत्युपा ७ शहविषोयाज्यानुवाक्येऽ
अनुष्टभौसंयाज्येऽमेरजतर्द० हिरण्यन्दक्षिणानानारूपतायाऽऋ

थोक्तमायानपञ्चमायशतमानंभवतिशतायुर्व्वैपुरुषः शतेन्द्रिय
आयुरेवेन्द्रियंवीर्य्यमात्मन्धत्ते १२ मंत्रार्थासफलासंतुपूर्णाः सं
तुमनोरथाः शत्रूणांबुद्धिनाशोऽस्तुमित्राणांमुदयोस्तवः १ ऋग्वे
दोथयजुर्वेदः सामवेदोह्यथर्वणः ब्रह्मवर्चसदानित्यंहन्यंतेतव
शत्रवः अक्षताविप्रहस्तेषुनित्यंवंदंतियेनराः चत्वारोवृद्धिमा
यान्तुआयुःकीर्त्तिर्य्यशोबलम् ३ उत्तिष्ठब्रह्मणस्पतेदेवयन्त
स्त्वेमहे उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्व्वेवासचा १३

गच्छगच्छसुरश्रेष्ठमात्मसंसारवाहनम् गच्छब्रह्मादयोदेवाऽस्मा
गच्छन्तुहुताशनम् १४ इतिदण्डकंसमाप्तम् छ छ
गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छ
हुताशनः ॥ छ ॥छ॥ छ ॥छ॥ छ

इदं पुस्तकं मुंबय्याख्य राजधान्यां श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीये श्रीवेंकटेश्वर यंत्रालये मुद्रितम्
संवत् १९३९


इति श्री दण्डकं समाप्तम्.